का॰का

३

॥श्रीगणेशाय नमः॥ अग्निहोत्रं मुनिश्रेष्ठ यस्मिन्देशे प्रवर्त्तते॥ दशयोज
नविस्तीर्णं काशीक्षेत्रं तदुच्यते॥१॥ दशजन्मादिभिर्वेदः शालजन्माग्निपरिग्र
हः॥ सहस्रजन्मनामंते सोमं पिबति वा न वा॥२॥ ऋत्विगात्माधनं जायाभुड्
यस्य च तुष्टये॥ तस्याग्निहोत्रं स्वार्ताय नरकायतरस्य च॥३॥ यस्य न स्युः स्त्र
यः पुत्रा लक्षलक्षाधमेव वा॥ स कथं मत्तमातंगमग्निहोत्रमुपासते॥४॥ पा
राशरस्मृतौ॥ इष्टं पूर्त्तं च कर्त्तव्यं ब्राह्मणेन प्रयत्नतः॥ इष्टेन लभते स्वर्गं पूर्ते
मोक्षमवाप्नुयात्॥५॥ अग्निहोत्रं तपः सत्यं वेदानां चैव पालनं॥ आतिथ्यं वै
श्वदेवं च इष्टमित्यभिधीयते॥६॥ इष्टापूर्त्तौ द्विजातीनां सामान्यं धर्मसाधनं॥
अधिकारी भवेच्छूद्रः पूर्ते धर्मे न वैदिके॥७॥ वापीकूपतडागानि देवतायतना
नि च॥ अन्नप्रदानमारामाः पूर्त्तमित्यभिधीयते॥८॥ शौनकः॥ श्रौतस्मार्त्त

३

इति द्वेयो द्विविधोग्निर्द्विजन्मनां ॥ गार्हपत्याहवनीयो दक्षिणाग्निरिति त्रयः ॥ ९ ॥ श्रुति
भिस्तिस्रभिः सिद्धाः श्रौताग्नेते त्रयो मताः ॥ स्मार्तोग्निर्द्विविधो ज्ञेयो गृह्यपौरुषएव
च ॥ १० ॥ यस्मिन्विवाहं कुरुते सोग्निर्गृह्य इति स्मृतः ॥ जातकर्मादिसिद्ध्यर्थं यो व्याहृ
तिभिरीरितः ॥ ११ ॥ सोग्निः पौरुष इत्युक्तः शालाग्निर्लौकिकः स्मृतः ॥ कुर्याच्छ्रौता
नि कर्माणि श्रौतेष्वेवाग्निषु त्रिषु ॥ १२ ॥ गृह्यगृह्याणि कर्माणि त्वितराणि लुपौरु
षे ॥ जातकर्मादिलोपे न प्रायश्चित्तं च कर्म च ॥ १३ ॥ संध्यादिनित्यलोपे तु प्रायश्चित्तं
न कर्मलल् ॥ अथ स्वस्वसूत्रनिर्णयः ॥ स्मृतिसंग्रहे ॥ इष्टापूर्तादिकं कर्म स्वशाखोक्तेन
विद्यते ॥ तत्र बौधायनं ग्राह्यं बहृचादिभिरादरात् ॥ १४ ॥ यज्ञकांडे ॥ यजुर्वेदस्य शाख
तां संदेहे समुपस्थिते ॥ कासु शाखासु लंबेरस्ता इष्टीपु च बहृचीः ॥ १५ ॥ आचार्ययोर्वं
जमानं ग्राह्यं बौधायनीयकं ॥ अन्यथा पतितो ज्ञेय इति बौधायनाज्ञया ॥ १६ ॥ यस्या
पस्तंबशाखी यो भवेन्मातामहो यदि ॥ तस्या बौधायनाभावास्तत्सूत्राधानमिष्यते ॥ १७ ॥

का॰ श्रा
२

अन्यथा सूत्रलंघ्या कर्म हो ऋषि संमतं ॥ आधानं येन सूत्रेण तेनैवेज्यादि
काः क्रियाः ॥ १८ ॥ अन्यथा चेत्कृतं कर्म तत्फलं न प्रयच्छति ॥ श्रौतश्रौव कृत्वा प्रौ
क्तं सूत्रं बौधायनं परं ॥ १९ ॥ अतस्तेनैव कर्माणि कर्त्तव्यानि फलेप्सुभिः ॥ आप
स्तंभादिभिरपि स्वसूत्राभावतस्तथा ॥ २० ॥ बौधायनेन कर्त्तव्यमन्यं था पातितो भ
वेत् ॥ चतुर्विंशातिमते ॥ अग्निहोत्रफला वेदाः षडंगाः सपदक्रमः ॥ अग्निहोत्रा
त्परो धर्मो न भूतो न भविष्यति ॥ २१ ॥ जीवत्पितरि नादध्यान्नाहिताग्निः सवैम
दि ॥ तथैव भ्रातरि ज्येष्ठे न यजेन्न विवाहयेत् ॥ २२ ॥ अनाहिताग्नौ पितरि आ
धानं तु करोति यः ॥ अरण्यां ह्यग्निमारोप्य स्थापयेत् द्विजोत्तमः ॥ २३ ॥ ज्येष्ठ
भ्रात्रा त्वनुज्ञातः कुर्यादग्निपरिग्रहं ॥ अनुज्ञातोपि सन् पित्रा नादध्यान्मनु
रब्रवीत् ॥ २४ ॥ अग्निहोत्रं प्रकुर्वन्त ज्ञानवान् श्रद्धयान्वितः ॥ इष्टिं च पशुसो

२

मांश्च पाकयज्ञास्सुरार्चनं ॥२५॥ धर्माचारांश्च दानानि कुर्याद्धर्मपरायणः ॥ गृह
स्थस्तु सदा युक्तो धर्ममेवानुचिंतयेत् ॥२६॥ राज्यप्रतिग्रहो घोरो मध्वास्वा
दो विषोपमः ॥ पुत्रमांसं वरं भुंक्तं न तु राजप्रतिग्रहः ॥२७॥ न कुर्यात्कृषिवाणिज्ये
सेवां हिंस्रं तथैव च ॥ ब्राह्मण्याद्धियते ते न तस्मात्तानि विवर्जयेत् ॥२८॥ स्मृ
तिसंग्रहे ॥ संध्या स्नानं जपो होमो देवतानां च पूजनं ॥ आतिथ्यं वैश्वदेव
श्च षट्कर्माणि दिने दिने ॥२९॥ स्मृत्यर्थसारे ॥ विवाहात्सप्तमाधाय गृह्यके च
ग्निहोत्रकं ॥ दर्शपूर्णमासाग्रयणसोमयागान् क्रमाच्चरेत् ॥३०॥ गृहस्थ
स्तु षडग्निस्याच्चाग्निश्चतुरग्निकः ॥ स्यात्त्रिरग्निरथैकाग्निर्वाग्निहीनः
कथंचन ॥३१॥ आश्वलायनः ॥ यो नग्निरुपसेवेत दारान्कामाद्दतावपि ॥
परदारी स विज्ञेयः स्वस्त्रीस्वीकरणादपि ॥३२॥ यमः ॥ क्लेदितास्फादिता

का॰ क्रा
२

स३

न्वे वसुधिरा ग्रंथिमूर्धिका ॥ चतुर्विधारणी त्याज्या श्रेयस्कामैर्द्विजादिभिः ॥ २३ ॥
क्रुद्धिता हनने पुत्रान् स्फाटिता शोकमावहेत् ॥ ग्रंथिमूर्धा हरेत्पत्नी सुषिरा पति
मारिणी ॥ २४ ॥ श्वश्रूश्च पतितो दक्ष्या काकवानररोमभिः ॥ स्वरह्रा मूत्रपुरीषेण विन
ष्टस्त्वरणी ध्रुवं ॥ २५ ॥ सप्तभिः पंचभिर्वापि त्रिभिर्वा वेष्टनैर्युता ॥ अरणी न प्रदष्ये
त पतिना दिवसे मागमात् ॥ २६ ॥ सीमातिक्रमणो न धाउत्तारे प्युन्निनाविना ॥ नौर्नौ
यातिन संदेहो यमोवैवस्वतो ब्रवीत् ॥ २७ ॥ उदयास्तमिते सोम्नो दंपती चेद्दहिर्गतौ ॥
आरूढो वाध्वतो व भिर्न नाशो त्रेतिके च न ॥ २८ ॥ पत्नी रजश्वलायां चेन्नामंगता ब
सेत्के चित् ॥ सूतके पितथा तद्वत् पथा पत्न्या प्रवासतः ॥ २९ ॥ वृकी नाम पिबेत् कस्याः
प्रवासे नात्ययते नरः ॥ तावेव सूतके जाते पूर्णाहिं महापदि ॥ ३० ॥ पुष्पवत्यां च
भार्यायां न कुर्यात्न कदाचन ॥ वकी नाम पिवेत् कस्यां उदक्यायां तु न ब्रजेत् ॥ ३१ ॥
— — — — — — — — — एकादशीचतुर्थ्येऽग्निं तु मिच्छेन्निमित्तत ॥ त्रेयीमुक्ता

२

लुयोलो भात्रवसेत्सर्वसंधिषु ॥४२॥ करोति पुनराधानं प्रायश्चित्तमरणाद्गते ॥ अग्निका
र्यस्य वेलायां प्रवसेन्नैपर्वणि ॥४३॥ न विनाच निमित्तेन क्रीडार्थं तु न व्रजेत् ॥ नदीसं
तरणेग्नीनां सीमातिक्रमणे तथा ॥४४॥ सर्वत्राघंतसीम्नो वां स्वामिस्त्ह्यग्नयः ॥
इति कारिकायां वचनं ॥ पैठीनसिरपि ॥ गंजो [illegible] नारीसमारूढ्याथवा पुमान् ॥ योज
ने योजने कृच्छ्रमग्निश्चैव विनश्यति ॥४५॥ तृतीयप्रभृतीनां तु पर्वणामतिपातने ॥ पुन
राधेयमिच्छंतिकेचित्कृस्थु द्विजोद्विजाः ॥४६॥ देवलः ॥ होममह्न्यात्ययेदर्शपोर्णमासा
त्ययेथवा ॥ पिंडयज्ञात्यये चैव वैश्वदेवहूयस्य च ॥४७॥ पुनरेवाग्निमादध्यादिति भार्ग
वस्त्रासनं ॥ दामोदरनिबंधे ॥ अनातुरोप्रवासी च निश्चिंतो निरुपद्रवः ॥४८॥ पक्षे होमं
तु यो दद्यात्सन्न चरेत्सततिलव्रतं ॥ यो दहेदग्निहोत्रेण स्वेन भार्यां कथंचन ॥४९॥ सस्त्री
संप— तेच्चैव तस्य स्त्री च पुमान्भवेत् ॥ स्वस्थंतरे ॥ धनान्यर्जयितुं युक्तं प्रवासोप्यग्नि
होत्रिणः ॥५०॥ धर्मेहिंसंभवे द्विजातीर्थार्थं तु न व्रजेत् ॥ आधानदीपिकायां ॥ इक्षुसी

२ठी

7

का॰ क्रौ
४

रविकाराश्च भाष्ट्र भक्ष्य वाच्यथि ॥५३॥ परपक्वं न विज्ञेयं प्रवासे चाग्निहोत्रिणः ॥ यद्दूनं वा
रिहीनं च पक्वं केवलपावके ॥५४॥ तदन्नं फलवद्ग्राह्यं मनदोषो न विद्यते ॥ निक्षिप्याग्निं स्व
दारेषु परिकल्प्यर्त्विजं तथा ॥५३॥ प्रवसेदग्निमान्विप्रो वृथैव न चिरं वसेत् ॥ अन्यच्च ॥ क
वणावुविना धान्यपाचितं जातवेदसि ॥५४॥ तदन्नं फलवद्ग्राह्यं मनदोषो न विद्यते ॥ अत्रा
दपि न दुष्यंती ति पाठांतरे ॥ तंदुलायुग्निसंयोगात्पिष्टलवणयोगतः ॥५५॥ पानीयमंनं
संयोगात्फलं त्रितययोगतः ॥ श्रीधरीप्रदीपिकायां ॥ परान्नं पक्वं नाम्नीयाहुडुगोरसमंतरा ॥
॥५६॥ आहिताग्नेरयं धर्मो याज्ञिकानां तु संमतः ॥ गृहस्थानिरपि ॥ सर्वाधान्यथवाप्यर्धाधा
नीवाथावसथ्यकः ॥५७॥ परस्परं तु भुंजीयुरविरुद्धास्त्रयो मताः ॥ गृहस्थोन कः ॥ सर्वाधा
नी दक्षिणाग्नेः स्मार्तपाकादिकं चरेत् ॥५८॥ तदर्थमेव संज्ञेयो वृत्तकर्माविलौकिकः ॥ अस्त
येपि विरुद्धानां भोजनेमहति क्षितिः ॥५९॥ कथं निकुरुते भुक्तिं मित्रविंदाचरेदुधः ॥ प्रचे
ताः ॥ स्मृतिचिंतामणौ ॥ कृतहोमे तु नश्यात्कदाचिद्दक्षिणाग्निकं ॥६०॥ यदि मात्सापचे
त्सायं हुत्वाथ कर्तव्यं भोजनं विधिपूर्वकं ॥ पचनाग्नेःपचेदन्नं न पचेल्लौकिकाग्निके ॥६१॥

३४

४

दं नं भुक्त्वा चांद्रायणं चरेत्॥ याज्ञवल्क्यः॥ गृही त्वाग्नीन्समारोप्य यः परान्नं नि
षेवते॥ ९१॥ अभोज्यान्नं गृहस्थानां सोऽपि दैवादिषु गर्हितः॥ परान्ने नोदरस्थेन भार्यां स २२
मधिगच्छति॥ ९२॥ यस्यान्नं तस्य ते पुत्रा अन्नात् शुक्लः प्रवर्त्तते॥ सायणाचार्यः॥ व
रं कंदफलाहारो वरं वा वायुभक्षणं॥ ९३॥ वरं प्राणपरित्यागो नानाग्निगृहभोजनं॥
शूद्रप्रतिग्रहे व्यासः॥ शूद्रान्नरसपुष्टस्य अधीयानस्य नित्यशः॥ ९४॥ जपतो जु
ह्वतो वापि गतिरूर्ध्वा न विद्यते॥ यस्तु वेदमधीयानः शूद्रान्नमुपभुंजते॥ ९५॥ श्रु
वेदफलं याति रुद्रत्वं चापि गच्छति॥ एते दोषा भवंतीह शूद्रान्नस्य प्रतिग्रहे॥ ९६॥
अनुग्रहं तु वक्ष्यामि मनुना चोदितं पुरा॥ आमं वा यदि वा पक्वं शूद्रान्नमुपभुंजते॥ ९७॥
किल्बिषं भुंजते भोक्ता पश्चविप्रः पुरोहितः॥ षण्मासान्नथयो भुंक्ते शूद्रस्यान्नं नि
रंतरं॥ ९८॥ जीवन्नेव भवेच्छूद्रो मृतः श्वा न्वभिजायते॥ अहन्येवं निहन्तियः
------ शूद्रान्ने म्रियते द्विजः॥ ९९॥ आहिताग्नि

र्विशेषेण स शूद्रगतिभाग्भवेत्॥ मृतसूतकपुष्टांगो द्विजश्शूद्रांगभोजनः॥७०॥
अहमेवं न जानामि कां योनिं गमिष्यति॥ शूद्रान्नेनोदरस्थेन यः कश्चिन्म्रियते न
रः॥७१॥ स भवेच्छूकरो ग्राम्यस्तस्य वा जायते कुले॥ शूद्रान्नं शूद्रसंपर्कः शूद्रेण स
ह वासनं॥७२॥ शूद्राज्ञानागमश्चैव ज्वलंतमपि पातयेत्॥ राजान्नं तेज आदत्ते शूद्रान्नं
ब्रह्मवर्चसं॥७३॥ आयुः सुवर्णकारान्नं यशश्चर्मविकर्तिनः॥ कारुकान्नं प्रजां हन्ति बलं
निर्णेजकस्य च॥७४॥ गणान्नं गणिकान्नं च लोकेभ्यः परिकृन्तति॥ पूयं चिकित्सक
स्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियं॥७५॥ विष्ठा वार्धुषिकस्यान्नं शस्त्रविक्रयिणो मलं॥ ए
तेभ्योऽन्ये पभोज्यान्नाः क्रमशः परिकीर्तिताः॥७६॥ माता वा भगिनी वापि भार्या कन्या
च योषितः॥ न ताभिः सह भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत्॥७७॥ यच्छिद्रितेयया
ह स्य दशाश्वाग्नेमनस्विनी॥ महाव्याहृतयश्चैव दंपती भोजने स्मृते॥७८॥ इति
विवाहानन्तरं विषयं॥ गर्ग॥ सायं होमात्यये प्रातर्हुत्वा तां सो थमाहुतिं॥ प्रात

होमं ततः कुर्यादेष एव क्रमो विधिः ॥७९॥ सायमारभ्य जुहुयादाहुतीनां चतुष्टयं ॥
अथ सायं च प्रातश्च समहोमो विधीयते ॥८०॥ सायं प्रातस्तनौ होमावुभौ सायं सम
स्यतस्तु ॥ प्रातर्होमस्य चाकर्षे तस्माद्धोमो विधीयते ॥८१॥ सर्वथैव वसथ्याहे सायं
होमः पृथग्भवेत् ॥ तथैव पुत्रजन्मीयेन्हि प्रातर्होमः पृथग्भवेत् ॥८२॥ तिलाद्दधि यवाग्नू
श्च सर्पिरोदनतंदुलाः ॥ सोमो मांसमपस्तैलमग्निहोत्रहविर्दश ॥८३॥ मांसवर्जिता
नां दशानां होमनामन्यैतमेन जुहोति ॥ शौनकः ॥ होमे मुख्यो यजमानः पत्नीपुत्राश्च कन्यका ॥
ऋत्विक् शिष्यो गुरुर्भ्राता भागिनेयः सुतापतिः ॥८४॥ स्मार्तकर्मपरित्यागो राहोरन्य
त्र सूतके ॥ श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात् ॥८५॥ दिव्यभारसहस्रेण हो
मभारस्तानि च ॥ कोटिकन्याप्रदानेन न समं सायमाहुतिः ॥८६॥ स्मृतिदीपिकायां ॥ सू
तके कर्मणां त्यागः संध्यादीनां विधीयते ॥ होमः श्रौते तु कर्तव्यो वैश्वदेवं न कारयेत् ॥८७॥
सूतके शुद्धनाहांतं न कुर्याद्देवतार्चनं ॥ दानं प्रतिग्रहो होमः स्वाध्यायं च विवर्जयेत् ॥८८॥

का॰का

६

संवर्त्तः॥ संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्॥ नष्टाग्ने स्थूलके वापि सज्जनमाछे-
द्धो हितः॥ ८९॥ अस्य निषेधो गोभिलाथस्वाह॥ यज्ञेत त्रसु धोनि धो॥ अन्वाधाने स्वते
ते तु कथंचित् स्थूलकादिना॥ तत्रापरेद्युः कुर्वल्लते स्मादिष्टिं न कारयेत्॥ ९०॥ स्थूलकेऽस्त-
के चैव स्वयं होमो विधीयते॥ दृष्टिः परे न कर्तव्या स्वन्वाधाने कृते सति॥ ९१॥ स्थूलके नि स-
प्राप्ते दर्शे यागो न वै भवेत्॥ कृते तु पौर्णमास्यां गोदर्शे यागो विधीयते॥ ९२॥ स्थूलकेऽस्त-
के चैव पिंडयज्ञं तु कारयेत्॥ अन्वाधानं विनानेष्टिं कुर्याद्धोतं समाहितः॥ ९३॥ संध्यालोम-
स्वयं कुर्यात्पिंडयज्ञं तु कारयेत्॥ दर्शेष्टिं पौर्णमासेष्टिं न स्वयं पिंडयज्ञवत्॥ ९४॥ अथप-
र्वनिर्णयः॥ तत्र लौगाक्षिः॥ अपराह्णेऽथवा रात्रौ यदि पर्व समाप्यते॥ ऋतातपः॥ पूर्वाह्णे
मध्यमे वापि यदि पर्व समाप्यते॥ ९५॥ तदोपवासः पूर्वेद्युः तदहर्याग इष्यते॥ गोभिलः॥
आवर्तने यदा संधिः पर्व प्रतिपदो भवेत्॥ तदहर्याग इष्येत परतश्चेत्परेहनि॥ ९६॥
पर्वप्रतिपदोः संधिरर्वागावर्तनाद्यदि॥ तस्मिन्नहनि यष्टव्यं पूर्वेद्युः स्यादुपक्रमः॥
॥ ९७॥ आवर्तनात्परः संधिर्यदि तस्मिंस्तु पक्रमः॥ परेद्युरिष्टिरिष्येषः पर्वद्वयोवि

पि॰

६

निर्णयः॥९८॥सुमंतुः॥संधिश्चेत्संगवादूर्ध्वंप्राक्पर्यावर्तनाद्रवेः॥यागकालःसविज्ञेयःप्र
रतश्चेत्परेहनि॥९९॥प्रयोगपारिजातेविशेषः॥यागेदक्षिणाग्निंप्रज्वाल्यपिंडपितृयज्ञंकु
र्यात्॥दर्शस्खंडश्चेत्सवाधान्यर्धाधानिनीपर्वतिथौयथोक्तविधिवत्पार्वणश्राद्धंलकृत्वा
परेद्युर्दर्शयागानंतरंचतुर्थयामस्यप्रथमभागेआहिताग्निःसर्वाधानीचेच्छौनकोक्त
रीत्यान्वाधानानंतरंकुतपकालेपार्वणश्राद्धंसंकल्प्यअर्घ्यासादनांतंकृत्वापंचधावि
भक्तेस्यान्हेचतुर्थभागेपिंडपितृयज्ञंसर्वंसमाप्यततोर्घ्यदानादिआच्छादनांतंकृ
त्वाभोजनार्थानेनाग्नौकरणंविप्रपाणिषुकृत्वाभोजनांतेकर्मकृत्वाभोजनाचेनभु
प्र क्तशेषेणविप्रसमीपेपिंडदानंकुर्यात्॥अर्धाधानीतुकुतपकालेदर्शश्राद्धमनाहि×
×पिंडपितृयज्ञमध्येपिंडंदर्शश्राद्धमध्यपिंडेचेत्तत्कालेपत्नीप्राशयेत्॥×ताग्निवत्कृत्वा
चअर्थदक्षिणाग्निंविन्हस्यापिंडपितृयज्ञंकुर्यात्॥अर्धाधानीतुसर्वमनाहिताग्निव
त्कुर्यात्॥उक्तंच॥स्नातकोविधुरोवीरोवनस्थोब्रह्मचारिणः॥सर्वाधानेतुनह्यग्नौ

का॰का ६

पाग्निहोमो विधीयते॥१००॥ मासे पक्षेथवा केग्नावव्यूढा चाग्नौ द्वयोस्त्रिषु॥ अन्वाधाय च
रूं वेष्टिं कुर्याद्दारणमाश्रितः॥१॥ स्मृतिसंग्रहे॥ अहन्याश्राद्धिकं सर्वं यत्किंचेदृथक्कृभवे
त्॥ दर्शादिश्राद्धनिष्पत्तौ नित्यस्य पृथक्क्रिया॥२॥ तेनैव तस्य सिद्धिः स्यात्काम्येनित्या
ग्निहोत्रवत्॥ मदनरत्ने पारिजाते॥ नित्यश्राद्धं प्रकुर्वन्तु प्रसंगाद्यत्र सिध्यति॥३॥ श्राद्धां
तरे कृतेन्यत्र नित्यत्वात्तन्न हापयेत्॥ षड्गुणमते॥ ऋत्विग्भिः पशुबंधैश्च चातुर्मास्यैर्महा
मखैः॥४॥ इष्टापापैः प्रमुच्येत महद्भिरपि दुस्तरैः॥ वैश्वानरी व्रातपती पवित्रेष्टिं तथैव च॥५॥
ऋताहृतो प्रयुंजानः पुनाति दशपौरुषं॥ नव्याहृतिसमो होमो न गायत्र्यासमो जपः॥६॥
नाग्निहोत्रसमो यज्ञो न सत्येन समं तपः॥ अथ पकारवचनैः॥ अतिक्रामाभग्नांतेग्नौ सीमा
तिक्रमणे कृते॥७॥ अन्वारंभविनासीम्नो न याति क्रमणे कृते॥ यजमानश्च पत्नी च उभौ

हो॰२

प्रवसतो यदि॥८॥ ग्रामाद्द्वादिनागच्छेत्पुनराधानमर्हति॥ सीमांतेषु यदा पत्नी स्वैकरात्रम
वस्थिता॥९॥ वीरहत्या भवेत्तस्याः पुनराधानमर्हति॥ एकाकिनी यदा पत्नी वह्निमादा

७

यगच्छति॥१०॥ तत्र नाग्नौ परेत्याहुर्भार्याधाने न दुष्यति॥ न कुर्यात्पार्वणं किंचिद्धोमा
द्यादिति बंधनात्॥११॥ कुलद्वयांतरालं च नदीशाद्रैर्न चोच्यते॥ स्वदेशे ग्नियदि चांडा
लेकृदस्यादिशिरेव च॥१२॥ उपघातेषु सर्वेषु पुनस्त्रेतिसमिंधनं॥ विच्छिन्नेषु तु सर्वेषु
सर्वे धाग्रयणेषु च॥१३॥ इष्टिं तु मतिकुर्यात्तस्तत्र प्रकल्पयेत्॥ इति वचनद्वयमापाद्
षयं॥ पत्नीरजस्वलायांचेद्ग्रामं गत्वा वसेत्कुचित्॥१४॥ सूतके मृतके तद्वत्तथापत्याप्रवासतः॥ व
ह्वीनामपि चैकस्याः प्रवासे नेष्यते नलः॥१५॥ रत्नगुप्ते॥ पितृदेवक्रियाः कृत्वा परपाकेन सेव
ते॥ दाता कर्मफलं याति भोक्ता भुंक्ते तु किल्बिषं॥१६॥ पचनाग्नौ पचेदन्नं सूतके मृतके पि च॥
अपत्नीकास्तु वसेद्रात्री पुनराधानमर्हति॥१७॥ छंदोगपरिशिष्टे॥ स्वे ग्रामे वा भवेद्धोमो लौकिकेन
कदाचन॥ न स्याहिताग्नेः संकर्म लौकिके नो विधीयते॥१८॥ प्रवासिनाग्निहोत्रीणामग्निपं चाहव
ससवा॥ दातव्यो होम एकाहे सायंप्रातः पृथक्पृथक्॥१९॥ निर्वर्त्योपक्षहोमं तु व्रजेदन्यत्र पूर्व
ये॥ अग्न्यर्थं तत्र विज्ञेयं जीवनाथ्यपते भुवं॥२०॥ पौर्णमासीममावास्यां केचिच्छेर्मन्यतेः॥

क्र॰का
८

प्रायश्चित्तेपि देहांते न शुध्यति न पंक्तिभाक्॥२१॥ देशांतरविवाहे तु राजक्षेराष्ट्रभंगके॥ पक्ष
होमं तदा कुर्यादन्यथा पतितो भवेत्॥२२॥ पक्षहोमोन्यथा दत्तार्थं देशस्यानिवर्तनं॥ होमः पुनः
प्रकुर्यात्तु न चेत्तस्य स दोषभाक्॥२३॥ आहिताग्निः प्रवासी चेत्पक्षहोमे कृतेपि वा॥ प्रदीप्ता
ग्निं प्रतिष्ठाप्य व्याहृतिभ्योपतिष्ठते॥२४॥ यो अग्निमिति तु द्वाभ्यामाज्याहुतिमतः क्षिपेत्॥ पंच
नाग्नित्वमायाति भोजनांते तु लौकिकः॥२५॥ उपवासे समर्थानां विधानं चोक्तमीदृशं॥ प्रयोगपा
रिजाते विशेषः॥ आहिताग्निः प्रवासी चेत्पक्षहोमे कृतेपि वा॥२६॥ प्रायश्चित्तमिदं कुर्यादन्यथा
पतितो भवेत्॥ प्रदीप्ताग्निं प्रतिष्ठाप्य तिस्रोग्न्युपतिष्ठते॥२७॥ यो अग्निमिति तु द्वाभ्यामाज्या
हुतिमतः क्षिपेत्॥ पंचनाग्नित्वमायाति भोजनांते तु लौकिकः॥२८॥ उपवासे समर्थानां विधानं
चोक्तमीदृशं॥ प्रदीप्ताग्निमति प्रत्यग्निरूपसो जातवेदा इति॥२९॥ तिस्रो ग्न्य इति अग्नआ
यूंषीति तिसृभिः शेषं प्रसिद्धं इत्यन्वयः॥ स्मि.तिचिंतामणौ विशेषः कौ॰॥ पत्नीमामंतिको
तायदि सा नो गृहे यदि॥ आहोमा यदि नागच्छेत्पुनराधानमर्हति॥३०॥ रजस्वलायां भार्यां
यां सूतिकायामथापि वा॥ प्रवसन्नग्निमान्विप्रः पुनराधानमर्हति॥३१॥ विनाग्निना तु साप

सी
८

दी

त्नी नैमुदधिगामिनी ।। अतिक्रामेत्तदाग्नीनां विनाशः स्यादिति ध्रुवं ।। ३२ ।। असमक्षं तु दंपत्यो
होतव्यं न त्विंगादिभिः ।। द्वयोरप्यसमक्षं तु भवेद्धुतमनर्थकं ।। ३३ ।। उदक्यासूतिकापत्नी कदाचिद्ग्रा
ममाव्रजेत् ।। लौकिकाग्निः स विज्ञेयः पुनराधानमर्हति ।। ३४ ।। प्रोषिते तु यदा पत्नी कदाचिद्ग्रा
ममाव्रजेत् ।। होमकाले तु संप्राप्ते न सा दोषेण युज्यते ।। ३५ ।। अथ तत्रैव निवसेत् ग्रामं गत्वा वसे
त्क्वचित् ।। लौकिकाग्निः स विज्ञेय इत्येषा नैगमी श्रुतिः ।। ३६ ।। प्रदीप्ते चंद्रिकायां ।। यजमाने प्रवास
स्थे पत्नी यदि रजस्वला ।। सूतिका च भवेद्वापि अश्वमासफलं तदा ।। ३७ ।। यजमाने न मीपस्थे पा
दोनं लभते फलं ।। कर्माधिकारी जाते तु तुरीयांशं भवेद्ध्रुवं ।। ३८ ।। न फलं भवेत्तस्मात् प्रवासे चैव
सर्वदा ।। न कुर्याद्धवनं तस्मात् प्रवासे पर्वणी सदा ।। ३९ ।। गोरसश्च गुडो वाथ फलमूलेक्षवस्तथा ।।
पराग्निपक्वं यत्किंचित् पाकमाज्यं तथैव च ।। ४० ।। साग्निः पर्वणि नाश्नीयात् प्रवासे सर्वदा बुधः ।।
गृहे चैव न दोषः स्याद्दध्यादीनां च पर्वणि ।। ४१ ।। हरिद्रा गोरसं धान्यं चूर्णं चैलं वृणां गुडं ।। कुंकु
कं कर्दकं चैव पक्वदोषो न विद्यते ।। ४२ ।। यज्ञपर्णगतं तोयं यच्चूर्णं यच्च गावि शुद्धे ।। तैले तक्रे तथा
क्षीरे न दोषः स्यात् कदाचन ।। ४३ ।। धनमर्जयितुं दूरे आहिताग्निर्गतो यदा ।। भुनक्त्यन्नं हि

17

निर

पक्वंच भुंक्ते क्षीरं गुडोथवा॥४४॥ औदुंबरं निष्पावा यावद्दद्रस्यु धारणं॥ पराग्निपक्वं नाश्नीया
दुस्वनास्तु सर्वदा॥४५॥ अग्नित्यागे तु यज्ञोक्तं प्राजापत्यं तदेव तु॥ प्राजापत्यं प्रकुर्वन्तु तभो
जने भोजने ध्रुवे॥४६॥ तस्मादेतन्न कर्तव्यं पक्वलौकाग्निना बुधैः॥ उत्सन्नाग्नि विप्रो षणानकु
र्यात्भोजनं क्वचित्॥४७॥ आपस्तंबोपि॥ प्रवसन्नग्निमान्विप्रः पयोभ्नीयात्फलान्यपि॥ अग्नौ
क्ते तु पचेद्दन्नं भुंजीत विधिपूर्वकं॥४८॥ ज्वरितो रोगितो वापि पाकं कृत्वा तु भोजनं॥ सामर्थ्ये
तु पुनर्जाते नैवाश्नीयात्पराग्निना॥४९॥ दक्षस्मृतिसंग्रहे विष्णुकात्यायनोक्तं॥ दर्शे वापो
र्णमासे वा पराग्नौ पाकसेवनात्॥ आधानं च कृतं नष्टं तस्मात्तद्वर्जयेद्बुद्धिमान्॥५०॥
अन्यथाप्यथ कुर्वाणो यदाग्नौ पाकसेवनात्॥ संवत्सरं कृतं तस्य पुण्यं चैव तु लुप्य
ते॥५१॥ स्मृतिभास्करे हारीतः॥ दर्शं च पौर्णमासं च विना चैव तु सोऽग्निकः॥ नोन्तरा
वपनं कुर्यान्मातापित्रोर्मृतिं विना॥५२॥ उत्सन्नाग्नेस्तथैवास्य वपनं चैव विद्यते॥
जीवत्पितृत्वमतः प्रोक्तं वपनं तु कृताकृतं॥५३॥ यज्ञकांडे॥ मासादूर्ध्वं तु वपनं प्रथमो
त्तमयज्वनां॥ कृतं न तु ग्रहस्थस्य वपनस्य जरा भवेत्॥५४॥ दर्शचा आग्रायणास्त

६

र्वक्षौरं नैमित्तिकं विना ॥ न कुर्वंत तलदूर्ध्वं तु स्वेच्छया वपनं चरेत् ॥५५॥ मुंडनस्य निषेधे
तु कृंतनं तु विधीयते ॥ कृंतनं दद्गा धा वापि न क्षुरेण कदाचन ॥५६॥ गंगायां भास्करक्षेत्रे
मातापित्रोर्गुरोर्मृते ॥ आधाने सोमपाने च वपनं सप्तधा स्मृतं ॥५७॥ आहिताग्निः
प्रवासी तु सज्जनं स्वपचेत्कथं ॥ ते उभे त्वयि निर्मथ्य समाप्य च पुनर्मथेत् ॥५८॥ व्या
ममात्रेण स्रुवेणाग्नौ धिते च बलीयसा ॥ त्रिभिरावेष्टकं वेष्टयं यात्राग्नेर्न तु मंथनं ॥
॥५९॥ समानि चतुरस्राणि छ्यंगुलानि समंततः ॥ कुर्याद्देवं कपालानि का[illegible] प्राक्पापि
समंततं ॥६०॥ द्वे कपाले त्रिकादीनि कुर्यात्तदनुमानतः ॥ एवमादि समावेद्यानि यादोत्सर्गि
कं सदा ॥६१॥ विमुक्ता तु विकल्पादि या किंचिदंतरा मुतुः ॥ तत्रास्य वायवीयोदाय वृत्तं त्वन
न्नानं स्मृतं ॥६२॥ अव्रतस्य हविर्देयाः पितरोपि कथं च न ॥ न च कृंतितततः साग्निः श्रौ
ते स्मार्तेषु सव्रतः ॥६३॥ केशाम नन्नानं प्रोक्तमन्याधानं तु केचन ॥ अक्षारयवमुद्गान्नं फ
लाहारं तु केचन ॥६४॥ तिलमुद्गाद्दते धान्यं सस्य गोधूमकोद्रवाः ॥ चणकं देवधान्यं च ए
ते

चौ६

का० का
१०

सारगणास्त्यता॥६५॥उपवाससमं धर्मा नांमन्वाधानादिचोदितं॥फलाभावेसदादीनांवि
कारः फलवन्मतः॥६६॥ आहिताग्निस्तु यो लोभात्प्रवासं पर्वसं पर्वसंधिषु॥ करोतिपुनरस्
याने प्रायश्चित्तमतो हतो॥६७॥ नाग्निको यस्य वेलायां प्रवसेत्तत्र पर्वणि॥ नविनाचाग्नि
मि[illegible]नक्रीडार्थं तु न तु व्रजेत्॥६८॥ यथासंध्या यथा स्नानं वेदस्याध्ययनं तथा॥ तथै
वोपासनं [illegible] नास्थितिस्तद्वियोगतः॥६९॥ अग्नावनुगते यस्य होमकालद्वयं व्रजेत्॥
उभयोर्विप्रवासो वा लौकिकाग्निर्विधीयते॥७०॥ अतो विनाससमारूढ [illegible]प्यापरासु
नाम्॥ हुतोऽग्निर्लौकिको लेयो नदीसत्रनिदर्शनात्॥७१॥ हुतोऽग्निर्यदि नश्येत मध्यमानो
हुताशनः॥ आमासीमांतरं गच्छे प्रत्यक्षोहव्यवाहनः॥७२॥ हुतः संवत्सरं गच्छेदुदके
नष्टमंगतः॥ शिक्येनोद्वाहयेदग्नीन् पुनराधानमर्हति॥७३॥ उपघातक्रियालोपे उपेक्षा
च प्रमादतः॥ चतुर्विधमिदं प्रोक्तं पुनराधानकारणं॥७४॥ अरण्योर्नष्टयोर्वापि द
ग्धयोः क्षीणयोस्तथा॥ आहृत्यान्यां समारोप्य पुनस्तेनैव निर्मथेत्॥७६॥ प्रासि

20.

श्री

अरण्योःक्षयनाशाग्निदाहेग्निंचसमास्तलाता॥ पालयेद्दुपशांतेतस्मिन्पुनराधानमर्हति॥८०॥ अरण्योःस्वल्पयागं तुयावत्तिष्ठतिपूर्वयोः॥ नतावत्पुनराधानमन्यारण्योर्विधीयते॥७८॥ हिरण्यसंकलार्थेन्वयत्रयत्रनदृश्यते॥ तत्रतत्रनयेदाज्यं तेजोसीतिनिदर्शनं॥७९॥ अरनयोर्यदिनव्येरं नरण्योरविनश्यतोः॥ ताभ्यामेवादधीताग्निनान्येकुर्यादितिश्रुतिः॥८०॥ त्रीणियज्ञेप्रधानानिद्रव्यमाहुर्मनीषिणः॥ यजमानश्चपत्नीचरथकारस्तथैवच॥८१॥ कुर्यात्स्वादेशमात्रं तुपवित्रंविधुदेवतं॥ ननखेननकाष्ठेननान्यसेनन्नन्यमाये॥८२॥ नखेनतुभवेद्व्याधिःकौनार्थोनसिध्यति॥ आयसेनभवेन्मत्स्युर्नन्मयेकलहोध्रुवं॥८३॥ अथपर्वेरनेहरं कृत्वास्वंगुष्ठांगुलपर्वसु॥ छिद्यान्यवित्राणिमुखेस्थेवं धर्मोनदुष्यति॥८४॥ कपालनाशमेदेन्वयत्किंचित्पात्रभेदनं॥ पवित्रनाशेवेदेचऋत्विजानांप्रपर्वणो॥८५॥ आज्याहुतिस्तुहोतव्याव्याहृत्याप्रणवेनच॥ पर्वणीपर्वसंधयेयज्ञंमेषज्यतेश्रुतिः॥८६॥ प्रातर्होमःसंगवालःकालस्त्वेनुदितेथवा॥ सायमस्तमितेहो

५

21

मः कालस्तु नवनाडिकाः ॥८७॥ पश्चादस्तमये कालो योभवेत्रिमुहूर्त्तकः ॥ससायंहोमकालश्च
दोषांतो निगद्यते ॥८८॥ यस्तु पूर्णनाडिकाः कालः पश्चादेवोदयाद्रवेः ॥ सहोमकालवि प्राणां संगवां
तइति स्मृतः ॥८९॥ अनाश्रमी न तिष्ठेत क्षणमेकमपि द्विजः ॥ आश्रमेन विना तिष्ठेत्स्वायश्चि
त्तीभवेद्द्विजः ॥९०॥ परदारः स विज्ञेयः स्वस्त्री स्वीकरणादपि ॥ नानग्निरूपसेवेत दारान्कामादृता
वपि ॥९१॥ क्षुत दारो पतिष्ठेत क्षणमप्यग्निना विना ॥ तिष्ठेन्नेवद्विजो व्रात्यः स्तथा च पतितो भवे
त् ॥९२॥ परदारी स विज्ञेयः स्वस्त्री स्वीकरणादपि ॥ आलस्यादथ वा लोभाद्योग्निना यातुमर्द्द
ति ॥९३॥ न यजेत्स्वाक यज्ञे [illegible]स याति नरकान्बहून् ॥ एवं ग्रहस्थाश्रमसंस्थितस्य तत्तीर्थेगतिः
पूर्वतरैर्निबद्धा ॥९४॥ सर्वाणि तीर्थानि विनाग्निहोत्रैस्तुल्यान्यग्निनैवाग्निवयंवदामः ॥ दिव्य
नागसहस्त्राणि हेमभारशतानि च ॥९५॥ कोटि कन्याप्रदाने न सममासासायमाहुतिः ॥ गजा
श्वरथदानानि हेमभारशतानि च ॥९६॥ गवां कोटिसहस्त्राणि न तुल्यां प्रातराहुतेः ॥ योदद्या
त्कांचनं मेरुं पृथिवीं च ससागरं ॥९७॥ससायं प्रातर्होमस्य कलां नार्हति षोडशीं ॥ अग्निहोत्रं
गवालंभं संन्यासं पलपैतृकं ॥९८॥ देवराच्च सुतोत्पत्तिः कलौ पंच विवर्जयेत् ॥ याद्वर्णप्रेम्णा
व

रोऽस्ति यावद्देहः प्रवर्त्तते ॥ ९९ ॥ अग्निहोत्रं च संन्यासं कर्त्तव्यं च कलौ युगे ॥ सोमपश्चाग्यला
भेनु सवने हविर्विधीयते ॥ १०० ॥ पशुसोमफलं तस्य संपूर्णं स्यादिति श्रुतिः ॥ न स्मरेत्तु क्रि
छंदः श्राद्धे वैताग्निके मखे ॥ १ ॥ ब्रह्मयज्ञं च वै तद्वत्तथोंकारो तु नोच्चरेत् ॥ सकारे सत्तके वि
घा हकारे रिपुवर्धनं ॥ हकारे ब्रह्महत्या च आहतिः कुत्र दीयते ॥ त्रीन् वर्णांश्च समुच्चार्य आ
कारे यो ददाति च ॥ ३ ॥ तैस्यात्तु ध्यं भवेत्तेज आहुतिस्तत्र जुहुति ॥ अज्ञानाद्वा प्रमादाद्वा वे
कल्यात्साधनस्य च ॥ ४ ॥ यन्न्यूनमतिरिक्तं च तत्सर्वं क्षंतुमर्हसि ॥ ५ ॥ अथाग्न्याधानं उ
दितलक्षणं कृतं यत्नं तत्र सुधीनिधौ ॥ यदग्न्यायतनानां तु स्फुटं तत्कथयाम्यहं ॥ १ ॥ वा
स्तुलक्षणसंयुक्तां शालां निर्माय यत्नतः ॥ तस्या द्वारद्वयं कार्यं प्राच्यां दक्षिणतः शुभं ॥
॥ २ ॥ प्रागायतां लिखेल्लेखां मष्टप्रक्रमसंमितां ॥ मध्ये प्रागायता वास्यास्त्र क्रमे द्वादशोर्ध्व
ता ॥ ३ ॥ एवमष्टपदं कुर्यादथवा द्वादशोः पदे ॥ प्रक्रमः पादमात्रोऽत्र पदं च द्वौ दशांगुलं ॥ ४ ॥
सा कूलंदतयोः कुर्यात्सुक्ष्माग्नेस्त्वादिरोद्वौ ॥ त्रयो दशांगुलं सूत्रं मञ्जुलसमन्वितं ॥ ५ ॥

का॰का

३२

अंत्यपादन्यसेच्छंकोपश्चिमाभ्रामयेत्ततः॥ आयामांतलिखेद्वृत्तं तंनिर्मायत
नस्मृतं॥६॥ प्राग्रेखासंमितंसूत्रंघोटासंभुज्ययत्नतः॥ तन्मितंसप्तमंभागंमे
लयित्वापुनस्तुतत्॥७॥ विभज्यपंचधासूत्रंलक्षयेत्सर्वभक्तिषु॥ तत्पूर्वापरयोः
शंकोर्विन्यसेत्साग्रासंयुतं॥८॥ द्वितीयंचिन्हमाकृष्यन्तानेदक्षिणतोनयेत्॥ निद
ध्यात्तत्रवेत्राकुः कुर्वल्लेवमुदग्बुधः॥९॥ दक्षिणेयजमानस्यस्थानमुत्तरउत्करः॥
तस्यपश्चात्स्थितंचिन्हंकर्षेदुत्तरेततःपुनः॥१०॥ तदेवदक्षिणाकृष्यशंकुंभ्रमयेतःक्षि
त॥ दक्षिणोत्तरयोःशंकोर्मध्यरेखांप्रकल्पयेत्॥११॥ विन्यस्यपार्श्वयोस्सूत्रंतत्रपंच
दशांगुलं॥ तेनमंडलमालिख्यपार्श्वेतस्योत्तरेपुनः॥१२॥ रन्ध्रयोःसूत्रवृत्तंतयोःसंधिति
यस्यच॥ भ्रमज्योत्तरखंडेचदक्षिणाग्निगृहंभवेत्॥१३॥ कृतायत्रोत्तरःशंकुर्होतस्था
नंतदिष्यते॥ प्राग्रेखापूर्वशंकोस्तुप्रास्यश्चादपिविन्यसेत्॥१४॥ शंकोर्वितस्तिमात्रेणांत
योःसूत्रंविनिक्षिपेत्॥ द्विरेखानिर्मितारज्जुलांछनद्वादशांगुले॥१५॥ अष्टादशांगुले

३२

पे२

त्तिन्हमुदग्दक्षिणयोर्नयेत्॥ चिन्हं विधायोभयत्रविपर्यस्योन्नसूत्रकं॥१६॥ दक्षि
णोत्तरा चिन्हे तु पूर्ववत्परिकल्पयेत्॥ तस्मात्त्र्यंगुले शंकुस्तस्माद्दक्षिणउत्तरे॥१७॥
चतुर्विंशांगुले शंकुस्तावत्सोपरिकीर्तितो॥ तन्मध्ये रेखा पश्चात्तु पश्चिमे संगतलेपुनः॥१८॥
चिन्हकृत्वा दक्षिणतस्तस्य दात्रिंशदंगुले॥ अंकुरूचरेत्तु रक्तवंतो श्रोणीपरिकीर्तितो॥१९॥
श्रोण्यं सन्नांकुमानं तु सूत्रं द्विगुणमभ्यसेत्॥ तदंतौ विन्यसेच्छंकौ मध्यं दक्षिणतो नयेत्॥२०॥
अ पूर्वंकोरेवं तु कुर्यात्सम्यग्मउत्तरे॥ पूर्ववत्स्वसमानो ध्वां वेदिरेवं भवेद्भुभा॥२१॥ अथ
तन्मेखलामानं संग्रहेणाभिधीयते॥ प्रथमा मेखला बह्विरंगुले रूच्छ्रिता भवेत्॥२२॥ ताव
न्मानावति यत्नेन तस्योपर्यष्टांगुलद्वयं॥ अंततो न्यां विरचयेद्व्यायेन षडंगुला॥२३॥ चतुरं
लमानं तु परिणाहेन कल्पयेत्॥ वेद्यास्तु मेखला पूर्वा चतुरंगुलमुच्छ्रिता॥२४॥ तावन्मा
नावति यत्ने वहिस्य त्र्यंगुलद्वयं॥ उत्तरो भयमानेन विज्ञेयाच्छंगुलं बुधैः॥२५॥ इतिद
र्शपूर्णमासे विहारलक्षणं॥ अथ चातुर्मास्यविहारः॥ यथोक्तलक्षणां वेदिं दार्शिकीं प्र

शु॰ का

१२

लिपाच॥ प्रक्रमद्वितयेशंकुः शंकुरग्रेष्टसप्ततः॥२६॥ तस्माच्चपुरतः शंकुः प्रक्रमेद्वादशेनेरौ
विद्॥ यथोक्तलक्षणां रज्जुमंततः पाशसंयुता॥२७॥ अंसेत्रयोदशोलक्ष्ये तथास्यास्त्वचतुर्द
शे॥ दक्षिणोत्तरतोप्येवं तंश्रोणीमत्तिलक्षणाम॥२८॥ विपर्यस्यचतां रज्जुं दक्षिणे कर्षयेद्दृढं॥
अंसेत्रयोदशे कृत्वा शंकुं दद्याच्चतुर्दशे॥२९॥ तावंसौ कथ्यतो वेदीर्धस्तान्नतमध्यमां॥
॥१२२२९५॥ अंसमानं १२३२९४ कूर्म ९ छोंनता चैषा पाशुकेपि प्रकीर्तिता॥३०॥ मध्ये शंकोः
पुरस्ताच्च षट्स्त्रु प्रमाणतः॥ शंकुं दद्यात्ततः पश्चात् षष्ट्यामात्रे तु कीलतः॥३१॥२६२॥प
श्चार्धं कोर्दक्षिणतस्तत्प्रमाणेन कीलतः॥ एवमुत्तरतः शंकुः पूर्वं तस्यैव मीरितं॥३२॥ अथा
स्राक्षेत्रफलं॥१४०४९४९७ ~~[illegible]~~॥३३॥ त्राभ्यामात्रोच्छ्रया कार्या यद्वा प्रादेशसंमिता॥
मेखलापक्षे॥ प्रथमं मेखला कार्या प्रक्रमं द्वितयोच्छ्रिता॥ आयतस्यान्तदैर्घ्ये न द्वितीयाम्ि
ष्टमानतः॥३३॥ प्रथमस्य चतुर्थेन अंसेनत्वायतायता॥ सस्य वञ्चतुरस्रोसाचुत्तराह
वनीयकः॥३४॥ यादेशाग्रामविस्ताराच्चतुरंगुलमुच्छ्रितां॥ चतुरस्रोत्तरां नाभिमध्ये कु

१२

॥३५॥

र्यात्तु तंत्र विल ॥ द्वितीयेश्व पदाकारां नाभिं कुर्याद्विचक्षणः ॥ आयता गोपदे नैषा वृत्तु
ला मे ध्यतो न्नता ॥३६॥ एषा स्यात्साश्वकावेदिश्वा तुमा स्येषु संमता ॥ मंडूपाधस्थल कु
र्या द्वेदिं पद्मां सदृश्यते ॥ ३७ ॥ मंडपस्य चतुर्द्वारो यत्तकाष्टै र्विराजितः ॥ वेधुत्तरां सशंको
श्व प्रत्यक् स्यक्का क्रमद्वयं ॥ ३८ ॥ तत्र शंकुं निहन्याच्च उदकतस्या सदद्वयं ॥ तत्रयंवा
स्य चात्वालं तत्र प्रादेश खातकं ॥ ३६ ॥ शम्यो मात्रं चतुस्त्रक्तिः कुर्यादेवं प्रमाणतः ॥ ४० ॥
॥७२७२११०३४॥ वेधुत्तरां समारभ्य प्रत्यक्क्रमचतुष्टयं ॥ उदगेक क्रमं क्रम्य उत्करः स
उदाहृतः ॥ ४१ ॥ ३०३५७५ ॥ पाशुबंधिकवेदिस्तु दक्षिणार्धे क्रमद्वयं ॥ प्रक्रम्य दाक्षि
की वेदीः कर्तव्या नतिलक्षणा ॥ ४२ ॥ यथोक्तलक्षणां रज्जुं मत तः पाशुसंयुतं ॥ हन्या
द्रज्जुप्रमाणेन शंकुप्रत्यंचिशंकुतः ॥ ४३ ॥ दक्षिणोत्तरतः शंकुद्वयाद्वेदिप्रमाणतः ॥ २४ ॥
॥ २१२४२४४५ ॥ वेधो श्वेवं पूर्वे पार्श्वौ विषमौ संप्रकीर्तितौ ॥ ४४ ॥ उच्छ्रयो दीर्घतावे
घा वेधमानानिति क्रमात् ॥ २४१२५१२५७ ॥ वेधोत्करएवस्यात्तत्र कार्यः परिग्र

का॰का

१४

हः॥४५॥ महादिक्षु श्वतिर्यक्का वेदी दि[illegible]संमिता॥ अथ चायतनप्राच्यां सक्रासं
[illegible]मुलिरवेत्॥४६॥ हस्तमात्रोच्छ्रया कार्या तावद्दीर्घा च मेखला॥ षडंगुलोच्छ्रया वा
पिका र्या वो धायनो ब्रवीत्॥४७॥ अथास्य क्षेत्रफलं॥ ५।६२।४२।४३।० ४४॥ इति चातु
र्मास्य विहारः॥ षड्ढस्तो त्रिरम्यस्य घड्डे न तु निरंतरं॥ अरत्नि द्वये न श्रोणी स्यात्सा
र्द्धा रत्नावथांसकौ॥४८॥ इति पाशुक विहारः॥ श्रौतानां गृह्यपात्राणां लक्षणं तु मयो
च्यते॥ हस्तो स्रुवो हंसमुख्यश्च तथा वायसपुच्छकः॥४९॥ त्रिप्रकारस्तु वो ज्ञेया स्त्रि
ष्वा सांतत्री लिप्यते॥ जुहूपभृद्ध्रुवादीनां मेकाकारत्व तो बुधैः॥५०॥ आयसो वाहुमा
त्र स्याद थवारत्नि मात्रिकः॥ प्रादेशो न मितो वापि मतो बौधायनादपि॥५१॥ द्वेधा विया
रित स्यापि त्वच्ये वास्ते च नास्पदं॥ काष्ठाग्नेर्हि च तज्ज्ञेयमिति बौधायनोऽब्रवीत्॥५२॥ वि
लमष्टांगुलं कार्यं हस्तोच्छ्रयः श्रौतविज्ञैः॥ हंसमुख्या काकपुच्छा विलं पंचांगुलं
स्मृतं॥५३॥ चतुरंगुलं त्र्यंगुलं च वैकल्पिकमिहेरितं॥ आयामाद्दमितो दंडः आदे

१४

नोऽरत्निमात्रिकः॥५४॥ दंडस्यैवमतान्तद्विबाहुमात्रेमनीषिणां॥ यथान्नोभमिता
प्राहुराचार्यास्तुबिलादिषु॥५५॥ स्रुवंस्त्वरत्निमात्रोस्यात्बिलंत्वंगुष्ठपर्वकं॥ ध्यष्टि
श्व मेक्षणं तद्वदग्रंवेदांगुलंभवेत्॥५६॥ द्वादशांगुलमायामंलदर्द्धेनतुविस्तृतं॥
उलूखलंबुधैःप्रोक्तंत्रिगुणंमुसलंभवेत्॥५७॥ अरत्निद्वयविस्तारमरत्न्याया
नमात्रकं॥ इतिवैकल्पिकंज्ञेयमुलूखलंबुधैःस्मृतं॥५८॥ प्रादेशमात्रंप्राशित्र
गोकर्णाकृतिरिष्यते॥ दंडोवेदांगुलःप्रोक्तःप्राशित्रहरणस्यतु॥५९॥ चतुरंगुलवि
स्तारोरत्निमात्रमितोभवेत्॥ स्फ्योस्य सिललाकारः प्रोक्तोवैधायनेन सः॥
॥६०॥ प्रादेशमात्रश्चमसश्चतुरंगुलदंडकः॥ बिलंत्वष्टांगुलंप्रोक्तंचतुरस्रंसुशो
भनं॥६१॥ षट्त्रिंशदंगुलंशम्याकुंवावाष्टांगुलास्मृता॥६३॥ पात्रमरत्निमा
त्रंदारुपात्रंचपंचचतुरंगुलविस्तारायामविबिले च॥६२॥ दोहनंचतुरंगुलं॥

क्रा॰का
३५

दंडप्रादेशमात्रं॥ अष्टांगुलवर्तुलं कार्यं॥ पिधानदंडरहितं तद्वदेव॥ ६३॥ मुंज
मयं त्रिवृतं तु भयतः पाशं व्यायाममात्रं योक्त्रं कार्यं॥ मृन्मयानि कपालानि षडं
गुला। नि॥ वैकंकत्यग्निहोत्रहवणी ध्रुवा वारणादिः स्रुवः॥ पालाशी जुहूश्चमसो
होमहवणी प्रचरण्यश्चाश्वत्थ्युपभृत् सषदाज्यधानी च॥ ६४॥ प्राशित्रयस्य षडास्या
खादिराणि॥ इतराणि होमार्थानि वारणानि॥ सोमे चमसा नैयग्रोधा औदुंबराः॥ सौ
मिकग्रहणादपि धर्मधानी प्रभृतीन्यौदुंबराणि तिपात्राणि॥ ६५॥ द्वात्रिंशत्सर्षपाणि का
गावः अतुःकर्षापणो वरः॥ एषे षट्कार्षापणाका अस्वाव न्धुहि स्मृतः॥ ६६॥ दश का
र्षापणा धेनोरश्वे पंचदशैव तु॥ हिरण्ये कार्षापणकापूर्णनवृत्तथाभिका॥ ६७॥ वस्त्रे
कार्षापणश्छागे ऽष्टौ पणा द्वादशाविके॥ वृषल्यामथ पंचाशान्मूल्यं कार्षापणाः स्मृ
ता॥ ६८॥ निष्के पंचाशदेव स्यात् गजे पंचशतानि तु॥ पंचकार्षापणाः प्रोक्ता दोलायां

४५

श्री

षट्‌ श्रेतथा॥ ६९॥ गृहे ह्येको कार्षापणकाः ... कार्षापणाः स्मृतः॥ ताम्रेकर्षे पि च पण इति
मूल्यप्रकल्पना॥ ७०॥ अधिकं कल्पयेन्मूल्यं न्यूनं वित्तानुसारतः॥ दक्षिणाविषये आवश्य
दानेमुख्यासंभवे या सा॥ अथमो स्वयपक्षः॥ सति वित्ते न संभवेप्यतो नो न न संकोचेप्यसंभ
वे स्मृतावप्युक्तं॥ निष्काः पंचाद्य दातव्या धेनोः पंच पुराणिकाः॥ ७१॥ धेनोरभावे दातव्यं तु
ल्यमूल्यं न संशयं॥ सुवर्णं वाथ दातव्यं निष्कं वाप्यथ कल्पयेत्॥ ७२॥ निष्कं निष्कार्द्धं पा
दं वा पंच कार्षापणान्निच॥ त्रीः कार्षापणान्यथवा शक्तितो मूल्यकल्पना॥ ७३॥ निष्कं
रूप्यं निष्कं तु दीनारो वा॥ दीनारस्तु भवेत्कर्षैः शतकार्षापणैस्तथा॥ दीनारो रौप्यके
रष्टाविंशत्याः परिकीर्तिताः॥ ७४॥ सुवर्णः स स्मृतितमो भागो रौप्य कथ्यते॥ कृष्णा
स्ते २ लः पंच ते माषः सुवर्णस्य तु षोडश॥ ७५॥ पंच गुंजा भवेन्माषस्ते सुवर्णस्तु षोडश॥
षोडशो भागो माषः कर्षः स सुवर्णस्य सुवर्णः॥ ७६॥ षोडशापणः पुराणः पुराणो भवे
काकिणी चतुष्केण पंचाहतैश्चतुर्भिर्वराटकैः काकिणी चैका॥ याज्ञवल्क्योपि॥ जा

का॰क्रा
९६

लस्त्रं मरीचीव्यं त्रसरेणूरजः स्मृतं॥ तेऽष्टौ लीक्षा तु तास्तिस्रो राजसर्षप उच्यते॥७७॥
गौरस्तु ते त्रयः षट् यवो मध्यस्तु ते त्रयः॥ कृष्णलः पंच ते माषस्ते सुवर्णस्तु षोडश॥७८॥
पलं सुवर्णाश्चत्वारः पंच वापि प्रकीर्तितं॥ द्वे कृष्णले रूप्यमाषो धरणं षोडशैव तु॥७९॥
तमानं तु दशार्धानि धरणैः पलमेव च॥ निष्कः सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः॥८०॥
इति कृष्णलो गुंजेत्यर्थः॥ इति मूल्याध्यायः समाप्तः॥ अथ पूर्णपात्रलक्षणं॥ यवे
र्व्रीहिभिः पूर्णमर्पितं पूर्णपात्रकं॥ वरलक्षणं॥ वरोभिलिखितं द्रव्यं सारभूतं तदु
च्यते॥ अथ स्रुवः॥ स्रुवं तु रत्निमात्रं स्याद्देविकुर्वे पावं तथा॥ विस्तारो दृषदः प्रोक्तो
द्वादशांगुलसंख्यया॥ ८१॥ द्विषडंगुलसंख्याको मूलदंडो विकंकतः॥ प्रस्थमात्रोदग
नाही प्रणीता च मसो भवेत्॥ ८२॥ वैकंकतं पाणिमात्रं प्रोक्षणीपात्रमुच्यते॥ हंस
यकृ प्रसेकश्च त्वग्बिलं चतुरंगुलं॥ ८३॥ दंडस्तस्य प्रणीतानां चमसांगुष्ठमानतः॥
आज्यस्थाल्च करंव्यौ तेजसी द्रव्यसंभवा॥ ८४॥ माहेयी वापि कर्तव्या नित्यसर्वा

९६

का॰का

१७

ल्या २

ग्नि कर्मसु ॥ आज्यस्थाल्या प्रमाणं तु यथा कामं तु कारयेत् ॥ ८५ ॥ मृन्मये ताम्रि
के वापि चरुस्थाली प्रशस्यते ॥ तिर्यगूर्ध्वसमिन्मानं दृढा नाति बृहन्मुखी ॥ ८६ ॥ कु
लालचक्रघटिता मासुरं मृन्मयं स्मृतं ॥ तदेव चक्रघटितं स्थाल्यादि खलु दैवतं ॥ ८७ ॥
॥ इति कारिका समाप्ताः ॥ शाके १७४७ वर्षे पार्थिव नाम संवत्सरे उत्तरायणे हेमं
र्त्तौ पोष कृष्ण नवम्यां सौम्यवासरे तद्दिने कारिका ग्रंथं समाप्तं ॥ शुभं भवतु ॥
अदृष्टदोषाद्यदि विभ्रमाद्वा यदर्थहीनं लिखितं मयात्र ॥ तत्सर्वमार्यैः परिशो
धनीयं कोपं न कुर्यात् खलु लेखकस्य ॥ देवोपनाम्ना दामोदरदेवस्य सूतेन ज
नार्दन देवेन लिखितं ॥ स्वार्थं परोपकारार्थं च ॥ श्री नृसिंहार्पणमस्तु ॥ ७ ॥
अर्जितं भैरविकहेन पुस्तकं लिखितं मया ॥ हर्तुं मिच्छसि यः पापी तस्य वंशक्षयो भवेत् ॥ १७

33